एस्.जगन्नाथः।मैसूरु
jagannathas1956@gmail.com

दशदिशम्

१

१६.२.२०२०

दशस्वपि दिक्षु कटाक्षं पातयन्ती संस्कृतपत्रिका।

संस्कृतेन भूषिताः पत्रिकाः सन्ति बह्व्यः।तासां संपादका जनाः परिश्रमेण स्वीयेन च व्ययेन पत्रिकाश्चालयन्ति। संस्कृतस्य पत्रिकासु प्रायोऽन्यभाषापत्रिकासु प्रकटितानां वार्तानां सांस्कृतो वेषो धार्यते।तासु स्वकीयत्वं केवलं संस्कृतसम्बद्धासु सभासु।न पुनस्ताः स्वयं वार्ता अन्विष्य प्रकाशयन्ति।संस्कृत पत्रिकाप्रचालनं नाम नह्यन्यत्र प्रकटितपूर्वासां वार्तानां संस्कृत भाषया देवनागरीलिप्या च मुद्रापणम्।

मया प्रारब्धायाम् एतस्यां पत्रिकायामपि नूतनानां वार्तानां नास्ति संशोधनम्।अस्मिंश्च विषये अन्यसंस्कृत पत्रिकाभ्यो दशदिशं न भिद्यते।तर्हि किमर्थमेषा पत्रिका निस्सर त्विति प्रश्नः स्वाभाविक एव।

इयानत्र विशेषः-या वार्ताः संस्कृतेतराभिर्भाषाभिः संस्कृतेतरासु पत्रिकासु प्रकाश्यते, तत्र परामर्शः तद्विषयिका मदीया च दृगत्र अन्यासां संस्कृतपत्रिकाणामपेक्षया वैसादृश्यम्।

अत्र सर्वं लेखनं मदीयमेव।अन्येषां लेखनावकाशो नास्ति।अन्यानत्र योजयितुं मम अभिप्रायोऽपि नास्ति। अत्र कारणं स्पष्टम्।अन्येषां योजने काश्चन व्यावहारिक्यः समस्याः संभवन्ति, या निवारयितुं नाहं शक्नोमि।तस्मादेव कारणादेषा पत्रिका निःशुल्कमासादयितुं शक्यते।**पत्रिकाया एतस्याः मूल्यं संस्कृतपठनाभिरुचिरेव।**

मम स्वीयं जालस्थानं नैतदवधि रचितम्।तस्मात् कारणादियं पत्रिका आर्कैव्(archive.org)इत्यस्मिन् जालस्थाने प्रकाश्यते।

संस्कृतेन किमपि वक्तव्यं, रचनीयं चेति बलवती मदीयाऽऽकाङ्क्षा। विषयाणां स्फुरणेऽपि, दीर्घसूत्रत्वं लेखन-व्यवसायं कदाचिद् बाधते।तस्मादियं पत्रिका साप्ताहिकी भवति।

अत्र संस्कृतग्रन्थानां (मयाऽवगतानां) विमर्शोऽपि योज्यते।नवीनाः कथाः, भावगीतानि इत्यादिकं साहित्यजातमपि स्वीयं प्रकाश्यते।स्वरचनाप्रचारार्थं कृतोऽयमभ्युपाय इति चेत् सत्यम्।अन्यभाषासु निष्ठावतां ग्रन्थरचयितॄणां पर्याप्तया मात्रया स्वकीयं नवीनं साहित्यं प्रसारयितुमवसरः।परन्तु संस्कृत-रचयितॄणां तु न तादृशोऽवकाशः।

अधुना पत्रिकेयं साप्ताहिकी भवति।प्रतिसप्ताहं किमप्यहं लिखाम्येव।गद्यस्य प्राधान्यं मम पत्रिकायां वर्तते।परन्तु पद्यानामपि यथासंभवम् अवकाशो वर्तत एव।न्यूनतमम् एकं पुटं वर्तत एव। पुटद्वयं पुटत्रयमित्यादिकं तु प्रसंगवशात्।

भाषादृष्ट्या पत्रिकाया एतस्याः काचिद् धारणा अस्ति। यद्यपि नाहं संस्कृतपण्डितः।(संस्कृतपण्डित इत्येतं शब्दमधिकृत्य कश्चन लेख आगामिनि भागे प्रकाशयिष्यते।) परन्तु संस्कृतभाषा इत्यस्मिन् रङ्गे अपरासां भाषाणाम् अभिनयं प्रायेण नाहं सहे।गत्यन्तराभावात् कदाचिदन्यासां भाषाणां संस्कृतवाक्य साम्राज्ये व्यापारं व्यवहारं स्वयमहं सहे। स च गत्यान्तराभावः कदाऽचिन्ममैवाज्ञानं भवितुमर्हति।परन्तु संस्कृतम् इति शब्दश्रवण मनु ये वाक्यविन्यासा अस्माकं बुद्धिपद्धतिमारोहन्ति तेभ्यो नाहं द्रुह्यामि।यत् कदाचित् पत्रिकायां सांस्कृताद् वाक्यमार्गात् प्रच्युतिः सा ममैवाज्ञानादिति सप्रश्रयं निवेदयामि।

संस्कृतम् इति शब्दस्य संस्कृतभाषा इत्येवार्थ इति मदीयो दृढो विश्वासः।संस्कृतग्रन्थेषु संस्कृतेतराभिर्भाषाभिः पीठिकानां रचना, संस्कृतसम्मेलनेषु संस्कृतेतरया ययाऽपि कयाऽपि भाषया संस्कृतस्तुतिः, प्राय आधुनिकानां संस्कृतज्ञानां पौनःपुन्येन "एतस्य संस्कृतग्रन्थस्य भाषान्तरेऽनुवादो लभ्यते वा" इति पिपृच्छिषा " संस्कृतभाषया विरचिता काऽपि व्याख्या उपलभ्यते वाऽस्य ग्रन्थस्य" इति पिपृच्छिषायाः प्रायो नैयून्यम्-इत्यादिकं संस्कृतभाषायाः स्थानं कथं नाम स्थिरीकुर्यात् ?

मम त्विदमेवाकूतम्-संस्कृतमिति शब्दस्य साम्राज्ये यावन्तं कालं संस्कृतेतरासां भाषाणामेवारभटी कर्णपटलं भिनत्ति तावत् "संस्कृतमधुनाऽपि जीवति" इत्यस्य कोऽपि नार्थः।या भाषा ग्रन्थपीठिकानां भाषा नास्ति, या च भाषा "स्याँस्क्रीट्" सम्मेलनेषु न वहते प्राधान्यं सा भाषा "विश्वभाषा" इति मर्दलस्य कोऽर्थः?

प्रायश एतैर्वाक्यैः पत्रिकाया एतस्याः किं ध्येयमिति स्पष्टभूयिष्ठम्।अलमेतावताऽधुना।

अन्ते विज्ञाप्यन्ते निर्मत्सराः सहृदयाः।यद्यपि फेस्बुक् इत्यत्र अहं सदस्योऽस्मि।परन्तु तस्य प्रयोजनं कथमासादनीयम् इति मम ज्ञानाद् बहिर्भूतम्।कृपया पाठकाः स्वयं दशदिशम् अधिकृत्य तत्र विषयप्रसारणं कुर्वन्तु।

प्रासंगिकं किञ्चित्।अधुना अधोनिर्दिष्टे मदीये द्वे कृती www.magicauthor.com इत्यत्र समुपलभ्येते।

१.**अस्तव्यस्तम्**-संस्कृतस्य नवीने कालेऽस्तित्वमधिकृत्य हास्यरसनिबिडं नाटकम्।

२.**गोगीतम्**-कन्नडभाषया केनचनाज्ञातेन कविना विरचितं "गोविन हाडु" इत्येतस्याः कृतेः सांस्कृतो वेषः।